Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ व्यासमन्त्र उच्यते —

ब्रह्मानुष्टुब्व्यासा ऋष्यादयः। व्यां बीजम्। नमश्शक्तिः। बीजेन दीर्घस्वरयुक्तेनाङ्गानि। व्यां वेदव्यासाय नमः। इति मन्त्रः॥ ध्यानम् —

मुनिव्राताबीतं मुदितधियमम्भोजरुचिर-
द्युतिं व्याख्यामुद्राकलितविलसद्दक्षिणकरम्।
परं जानौ कृत्वा दृढकलितकक्ष्यं कविवरं
समासीनं व्यासं स्मरत निरतं पुण्यचरितम्॥

अष्टसहस्रं जपेत्। आज्यसिक्तेन पायसेन दशांशं पुरश्चरणाहोमः। कविताप्रज्ञाव्याख्याश्रीप्रदानप्रधानोऽयं मन्त्रः॥